चतुष्पाच्च व्यविख्यत्पन्नाकं सविता वरणीयः प्रयाणमनूषसो विराजत्यधोरामः
सावित्र इति पशुसमाम्नाये विज्ञायते कस्मात्सामान्यादित्यधस्तात्तद्वेलायां तमो भ
वत्येतस्मात्सामान्यादधस्ताद्रामोऽधस्तात्कृष्णः कस्मात्सामान्यादित्यग्निं चि
त्वा न रामामुपेयाद्रामा रमणायोपेयते न धर्माय कस्माज्जातीयेतस्मात्सामान्यात्कृ
कवाकुः सावित्र इति पशुसमाम्नाये विज्ञायते कस्मात्सामान्यादिति कालानुवादं प
रीत्य कृकवाकोः पूर्वं शब्दानुकरणं वचेरुत्तरं भगो व्याख्यातस्तस्य कालः प्रागुत्स
र्पणात्तस्यैषा भवति ॥२२॥ प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो विधर्ता ॥ आ

उ०नि०

॥५७॥

पान्॥प्रत्यङ् विश्वं स्वर्दृशे॥ प्रत्यङिदं सर्वमुदेषि प्रत्यङिदं ज्योतिरुच्यते प्रत्यङिदं स
र्वमिदमभिविपश्यसीत्यपि वैतस्यामेव॥२४॥येनापावक चक्षसा भुरण्यंतं ज
नां अनु॥ त्वं वरुण पश्यसि॥तेन नो जनानभिविपश्यसि॥केशी केशा रश्मयस्तैस्तद्वा
न् भवति काशनाद्वा प्रकाशनाद्वा तस्यैषा भवति॥२५॥केश्यग्निं केशी विषं केशी
बिभर्त्ति रोदसी॥केशी विश्वं स्वर्दृशे केशीदं ज्योतिरुच्यते॥ केश्यग्निं च विषं च वि
षमित्युदकनाम विष्णातेर्विपूर्वस्य स्नातेः शुद्ध्यर्थस्य विपूर्वस्य वा स च ते द्यावापृथि
व्यौ च धारयति केशीदं सर्वमभिविपश्यति केशीदं ज्योतिरुच्यत इत्यादित्यमाह अथा
प्येते इतरे ज्योतिषी केशिनी उच्येते धूमेनाग्नी रजसा च मध्यमस्तेषामेषा साधार ॥५७॥
णा भवति॥२६॥त्रयः केशिन ऋतुथा विचक्षते संवत्सरे वपत एक एषां॥विश्वमेको

पलाशमिति वृक्षोऽजस्वनात्पलाशोपलशानादेवैः संगच्छते यमो रश्मिरादित्यस्तच्चेनः सर्व
स्य पाता वा पालयिता वा पुराणाननुक्रामयेताज एकपादजन एकः पाद एकेन पादेन पा
तीति वैकेन पादेन पिबतीति वैको ऽस्य पाद इति वा एकं पादं नोत्खिदतीत्यपि निगमो भ
वति तस्यैष निपातो भवति वैश्वदेव्यामृचि ॥२९॥ पावीरवी कन्या चित्रायुः सरस्वती
× सलिलाधं समुद्रस्य स्वेतमुधरेदं गुनस्त्यकनीम्म तं भवेदित्यपि निगमो भव
ति × [illegible] तन्यतुरेकपादजो दिवो धर्ता सिंधुरापः समुद्रियः ॥ विश्वे देवासः श्र
णवन्वचांसि मे सरस्वती सह धीभिः पुरंध्या ॥ पवीः शल्यो भवति यद्विपुनाति का
यं तद्वत्यवीरमायुधं तद्वानिंद्रः पवीरवान् ॥ अतितस्छो पवीरवानित्यपि निगमो भ
वति । तद्देवता वाक् पावीरवी पावीरवी च दिव्या वाक् तन्यतुस्तनित्री वाचोऽन्यस्या जंघे ॥५८॥

कपाद्दिवो धारयिता सिंधुश्चापश्च समुद्रियाश्च सर्वे च देवाः सरस्वती च सह पुरं
ध्या स्तुत्या प्रयुक्तानि धीभिः कर्मभिः प्रयुक्तानि श्रृण्वन्तु वचनानीमानीति ॥ पृथिवी
व्याख्याता तस्या एष निपातो भवत्यैंद्राग्न्यामृचि ॥३०॥ यदिंद्राग्नी परमस्यां पृथिव्यां
मध्यमस्यामवमस्यामुत स्थः ॥ अतः परिवृषणा वा हि यातमथा सोमस्य पिबतं सु
तस्य ॥ इति सा निगदव्याख्याता समुद्रो व्याख्यातस्तस्यैष निपातो भवति पावमा
न्यामृचि ॥३१॥ पवित्रवंतः परिवाचमासते पितैषां प्रत्नो अभि रक्षति व्रतं ॥ महः स
मुद्रं वरुणस्तिरो दधे धीरा इच्छेकुर्धरुणेष्वारभं ॥ पवित्रवंतो रश्मिवंतो माध्यमि
का देवगणाः पर्यासते माध्यमिकां वाचं पितैषां प्रत्नः पुराणोऽभिरक्षति व्रतं कर्म म
हः समुद्रं वरुणस्तिरोंतर्दधात्यथ धीराः शक्नुवंति धरुणेषूदकेषु कर्मण आरंभ

उ०नि०

॥५१॥

मारव्युमज एकपाद्व्याख्यातः पृथिवी व्याख्याता समुद्रो व्याख्यातस्तेषामेष निपातो
भवत्यपरस्यां बहुदेवतायामृचि॥३२॥उत नोऽहिर्बुध्न्यः शृणोत्वज एकपात्पृथिवी
समुद्रः॥विश्वे देवा ऋतावृधो हुवानाः स्तुता मंत्राः कविशस्ता अवंतु॥अपि च नो हि
र्बुध्न्यः शृणोत्वजश्चैकपात्पृथिवी च समुद्रश्च सर्वे च देवाः सत्यवृधो वा यज्ञवृधो वा ह्व
यमाना मंत्रैः॥स्तुता मंत्राः कविशस्ता अवंतु मेधाविशस्ताः अद्य प्रसक्तो ध्यानमि
तिवा प्रत्यक्षमस्मिन्ध्यानमिति वा॥अथर्वा व्याख्यातो मनुर्मननात्तेषामेष निपातो भव
त्यैंद्र्यामृचि॥३३॥यामथर्वा मनुष्पिता दध्यङ् धियमत्नत॥तस्मिन्ब्रह्माणि पूर्वथेंद्र उ
क्था समग्मतार्चन्ननु स्वराज्यं॥यामथर्वा च मनुश्च पिता मानवानां दध्यङ् च धियं ॥५१॥
मतानिषत तस्मिन्ब्रह्माणि कर्माणि पूर्व इंद्र उक्थानि च संगच्छतामर्चन्योऽनुपास्ते

भिचष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपं॥त्रयः केशिन ऋतुथा विचक्षते काले काले
अभिविपश्यंति संवत्सरे वपत एक एषामित्यग्निः पृथिवीं दहति सर्वमेकोऽभिविपश्यति
कर्मभिरादित्यो गतिरेकस्य दृश्यते न रूपं मध्यमस्याऽथ यद्रश्मिभिरभिप्रकंपयन्ने
ति तद्वृषाकपिर्भवति वृषाकंपनस्तस्यैषा भवति॥२७॥पुनरेहि वृषाकपे सुविता क
ल्पयावहै॥य एष स्वप्ननंशनोऽस्तमेषि पथा पुनर्विश्वस्मादिंद्र उत्तरः॥पुनरेहि वृषा
कपे सुविता कल्पयावहै॥य एष स्वप्ननंशनः स्वप्नान्नाशयस्यादित्य उदयेनसो
ऽस्तमेषि पथा पुनः सर्वस्माद्य इंद्र उत्तरस्तमेतद्ब्रूम आदित्यं॥यमो व्याख्यातस्तस्यैषा
भवति॥२८॥यस्मिन्वृक्षे सुपलाशे देवैः संपिबते यमः॥अत्रा नो विश्पतिः पिता पुराणां
अनुवेनति॥यस्मिन्वृक्षे सुपलाशे स्थाने वृतक्षये वाऽपि वोपमार्थे स्याद्वृक्षद्रवस्तु

उ०नि०

॥६०॥

तःसप्तापनस्तएवस्वपतोलोकमस्तमितमादित्यंयंति।तत्रजाग्रतोस्वप्नजोसत्रसद्दै
च्देवौ।शाय्यादित्याधित्यधिदैवतमथाध्यात्मं।सप्तच्षयःप्रतिहिताःशरीरे।षडिं
द्रियाणिविद्यासप्तम्यात्मानि।सप्तच्क्षंतिसदमप्रमादं।शरीरमप्रमाद्यंतिसप्ता
पनानीमान्येवस्वपतोलोकमस्तमितमात्मानंयंति।तत्रजाग्रतोस्वप्नजोसत्रसद्दौ
च्देवौ।प्राणश्चास्मात्तेजसश्चेत्यात्मगतिमाचष्टेतेषामेषापराभवति।७॥तिर्यग्बि
लश्चमसऊर्ध्वबुध्नोयस्मिन्यशोनिहितंविश्वरूपं।अत्रासततऋषयःसप्ततीरेकेयेअ
स्यगोपामहतोबभूवुः।तिर्यग्बिलश्चमसऊर्ध्वबुधनऊर्ध्वबोधनोवायुस्मिन्यशोनि
हितंसर्वरूपमत्रासततऋषयःसप्तसहेंद्रियाणियान्यस्यगोप्तृणिमहतोबभूवुरि
त्यात्मगतिमाचष्टे।देवाख्यातात्तेषामेषाभवति।८॥देवानांमद्राग्नुमतिर्ऋजूय ॥६०॥

तां देवानां रातिरभि नो निवर्त्ततां ॥ देवानां सख्यमुप सेदिमा वयं देवा न आयुः प्रतिरंतु जीवसे ॥
देवानां वयं भद्रा कल्याणी सुमतिः ऋजुगामिनामृजुगामिनामिति वा देवानां दानमभि नो
निवर्त्ततां देवानां सख्यमुप सेदिम वयं देवा न आयुः प्रवर्धयंतु चिरंजीवनाय ॥ किंच
देवाः सर्वे देवास्तेषामेषा भवति ॥ २१ ॥ ओमासश्चर्षणीधृतो विश्वे देवास आगत
॥ दाश्वांसो दाशुषः सुतं ॥ अवितारो वा वननीया वा मनुष्यधृतः सर्वे च देवा इहाग
च्छत दत्तवंतो दत्तवतः सुतमिति तदेतदेकमेव वैश्वदेवं गायत्रं तृचं दशतयीषु वि
द्यते यत्तु किंचिद्बहुदैवतं तद्वैश्वदेवानां स्थाने युज्यते यदेव विश्वलिंगमिति शाक
पूणिरनत्यंतगतस्त्वेष उद्देशो भवति बभ्रुरेक इति दश द्विपदा अलिंगाभूतांशः क
श्यप आश्विनमेकलिंगमभितष्टीयं सूक्तमेकलिंगं साध्या देवाः साधनात्तेषामेषा

उ॰नि॰

॥६१॥

भवति॥४०॥यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन्॥तेहनाकंमहिमा
नःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः॥यज्ञेनयज्ञमयजंतदेवाःअग्निनाऽग्निमयजं
तदेवाअग्निःपशुरासीत्तमालभंततेनयजंतेतिचब्राह्मणं।तानिधर्माणिप्रथमा
न्यासन्।तेहनाकंमहिमानःसमसेवंत।यत्रपूर्वेसाध्याःसंतिदेवाःसाधनाद्यु
स्थानोदेवगणइतिनैरुक्ताः।पूर्वंदेवयुगमित्याख्यानं।वसवोयद्विवसतेसर्वमग्नि
र्वसुभिर्वासवइतिसमाख्यातस्मात्पृथिवीस्थानाइंद्रोवसुभिर्वासवइतिसमाख्यात
स्मान्मध्यस्थानावसवआदित्यरश्मयोविवासनात्तस्माद्द्युस्थानास्तेषामेषाभवति
॥४१॥स्वगावोदेवाःसदनमकर्मयआजग्मसवनेदंजुषाणाः॥जक्षिवांसःपपिवां ॥६१॥
सश्चविश्वेस्मेधत्तवसवोवसूनि॥स्वागमनानिदेवाःसुपथान्यकर्मयआगछतस

सुपथस्र निवसंतु

वनानीमानिजुषाणाःखादितवंतःपीतवंतश्चसर्वेऽस्मासुधत्तवसवोवसूनितेषामेषा
पराभवति॥४२॥आयाअत्रवसवोरंतदेवाउरावंतरिक्षेमर्जयंतशुभ्राः॥अर्वाक्पथ
उरुज्रयःकृणुध्वंश्रोताहूतस्यजग्मुषीनोअस्य।आयाअत्रवसवोरमंतदेवा।आ
पृथिवीतस्यांभवाउरौचांतरिक्षेमर्जयंतगमयंतरमयंतशुभ्राःशोभमानाअ
र्वाचएनान्पथोबहुजवःकुरुध्वंशृणुतदूतस्यजग्मुषोनोअस्याग्नेर्वाजिनोव्याख्या
तास्तेषामेषाभवति॥४३॥वाजोभवतुवाजिनोहवेषुदेवतातामितद्रवःस्वर्काः॥जं
भयंतोहिंवृकंरक्षांसिसनेम्यस्मद्युयवन्नमीवाः॥सुखानोभवंतुवाजिनोह्वानेषुदेव
तातौयज्ञेमितद्रवःसुमितद्रवःस्वर्काःस्वंचनाइतिवास्वर्चिषाइतिवाजंभयंतोहिंवृ
कंचरक्षांसिचक्षिप्रमस्मद्यावयंतिवाद्देवाग्न्याइतिवादेवपत्न्योदेवानांपत्न्यस्तासां

त्रेषाभवति ॥४४॥ देवानांपत्नीरुशतीरवंतु नः प्रावंतु नस्तुजयेवाजसातये । याः पार्थि
वासोयाअपामपिव्रतेतानोदेवीः सुहवाः शर्मयछत । देवानांपत्न्यउशत्योऽवंतु नः प्रा
वंतु नस्तुजयेपत्यजननायचान्नसंसननायचायाः पार्थिवासोयाअपामपिव्रतेक
र्मणितानोदेव्यः सुहवाः शर्मयछंतुशरणंतासामेषापराभवति ॥४५॥ उतग्नाव्यं
तुदेवपत्नीरिंद्राण्य१ग्नाय्य१श्विनीराट् ॥ आरोदसीवरुणानीशृणोतुव्यंतुदेवी
र्यऋतुर्जनीनां ॥ अपिचग्नाव्यंतुदेवपत्न्यइंद्राणींद्रस्यपत्न्यग्नाय्यग्नेः पत्न्यश्विन्य
श्विनोः पत्नीराट्राजतेरोदसीरुद्रस्यपत्नीवरुणानीचवरुणस्यपत्नीव्यंतुदेव्यः
कामयंतांयऋतुः कालोजायानांयऋतुः कालोजायानां ॥४६॥ ॥अथमेरवलो॥ ॥ ॥६२॥
अतीतोह स्थानावसांतिषु स्मैहेहजाता प्रातर्युजा प्रातर्य्ये जे धमुपस्तद्धि चेमेता

तां देवानां रातिरभिनो निवर्त्ततां ॥ देवानां सख्यमुपसेदिमावयं देवान आयुः प्रतिरंतु जीवसे ॥
देवानांवयंभद्राकल्याणामतिर्ऋजुगामिनामृजुगामिनामितिवा देवानांदानमभिनो
निवर्त्ततां देवानां सख्यमुपसेदिमावयं देवान आयुः प्रवर्धयंतु चिरंजीवनाय ॥ किं
देवाः सर्वे देवास्तेषामेषाभवति ॥३९॥ ओमासश्चर्षणीधृतो विश्वेदेवास आगत
॥ दाश्वांसोदाशुषः सुतं ॥ अवितारोवावननीयावामनुष्यधृतः सर्वेचदेवा इहाग
छत दत्तवंतोदत्तवतः सुतमिति तदेतदेकमेव वैश्वदेवं गायत्रं तृचं दशतयीषुवि
द्यते यत्तुकिंचिद्बहुदैवतं तद्वैश्वदेवानां स्थाने युज्यते यदेव विश्वलिंगमिति शाक
पूणिरनत्यंतगतस्त्वेषउद्देशोभवति बभ्रुरेकइति दशद्विपदा अलिंगा भूतांशः का
श्यपआश्विनमेकलिंगमभितष्टीयं सूक्तमेकलिंगं साध्यादेवाः साधनात्तेषामेषा

॥६१॥

भवति॥४०॥यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन्॥तेहनाकंमहिमा
नःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः॥यज्ञेनयज्ञमयजंतदेवाःअग्निनाऽग्निमयजं
तदेवाअग्निःपशुरासीत्तमालभंततेनयजंतेतिचब्राह्मणं।तानिधर्माणिप्रथमा
न्यासन्।तेहनाकंमहिमानःसमसेवंत।यत्रपूर्वेसाध्याःसंतिदेवाः।साधनाद्यु
स्थानोदेवगणइतिनैरुक्ताःपूर्वंदेवयुगमित्याख्यानं।वसवोयद्विवसतेसर्वमग्नि
र्वसुभिर्वासवइतिसमाख्यातस्मात्पृथिवीस्थानाइंद्रोवसुभिर्वासवइतिसमाख्यात
स्मान्मध्यस्थानावसवआदित्यरश्मयोविवासनात्तस्माद्युस्थानास्तेषामेषाभवति
॥४१॥स्वगावोदेवाःसदनमकर्मयआजग्मसवनेदंजुषाणाः॥जक्षिवांसःपपिवां ॥६१॥
सश्चविश्वेस्मेधत्तवसवोवसूनि॥स्वागमनानिदेवाःसुपथान्यकर्मयआगछतस

सुपथस्र निवसंतु

नमसखा मदनस्सखायेनः सखायस्तैः सहेतिवा। सर्वस्माद्यइंद्र उत्तरस्तमेतद्ब्रूमआ
दित्यमथैषाप्यितेरः॥४॥सृण्येवज[illegible]र्भरीतुर्फरीतू नैतोशेवतुर्फरीप र्फरीका॥उद
न्यजेवजेम नामदेरू तामेजराय्वजरंमरायु॥सृण्येवेतिद्विविधासृणिर्भवतिभ
र्त्ता च हंता च तथाश्विनौ चापि भर्त्तारौ जर्भरी भर्त्तारावित्यर्थस्तुर्फरीतू हंतारौ। नैतोशेव
तुर्फरीपर्फरीका॥नितोशस्यापत्यं नैतोशं नैतोशेव तुर्फरी क्षिप्रहंतारौ। उदन्यजेव
जेमना मदेरू उदन्यजे वत्युदकजेइव रत्ने सामुद्रे चांद्रमसे वा जेमने जयमाने जेम
नामदेरू। तामेजराय्वजरंमरायु। एतज्जरायुजं शरीरं शरदमजीर्णं मथैषा सोम
स्य॥५॥तरत्समंदी धावति धारासुतस्यांधसः॥ तरत्समंदी धावति॥ तरति सप
पं सर्वं मंदीय स्तौति धावति गच्छत्यूर्ध्वां गतिं। धारासुतस्यांधसः॥ धारयाभि

षुतस्य सोमस्य मंत्रपूतस्य वा वा स्तुतस्याथैषा यज्ञस्य ॥ ६ ॥ चत्वारि शृंगा त्रयो अस्य
॥ ६४ ॥ पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आवि
वेश ॥ चत्वारि शृंगेति वेदा वा एत उक्तास्त्रयो अस्य पादा इति सवनानि त्रीणि द्वे शीर्षे प्रा
यणीयोदयनीये सप्त हस्तासः सप्त छंदांसि त्रिधा बद्धस्त्रेधा बद्धो मंत्र ब्राह्म
णकल्पैर्वृषभो रोरवीणमस्य सवनक्रमेण ऋग्भिर्यजुर्भिः सामभिर्यदेनमृग्भिः शं
संति यजुर्भिर्यजंति सामभिः स्तुवंति महो देव इत्येष हि महान् देवो यद्यज्ञो मर्त्यां आ
विवेशेत्येष हि मनुष्यानां विशय यजनाय तस्योत्तरा भूयसे निर्वचनाय ॥ ७ ॥ स्तुव स्व
र्यंतो नापेक्षंत आ द्यां रोहंति रोदसी । यज्ञं ये विश्वतोधारं सुविद्वांसो वितेनिरे ॥ स्व ॥ ६४ ॥
र्गच्छंत ईजाना वा नेक्षंते ते तमुमेव लोकं गतवंतमीक्षंत इति वा द्यां रोहंति रोदसी । यज्ञं

ये विश्वतोधारं सुविद्वांसो वितेनिर इत्यथैषा वाचः प्रवह्लिकेतेव ॥ ८ ॥ चत्वारि वाक्परिमि
ता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहिता नेंगयंति तुरीयं वाचो
मनुष्या वदंति ॥ चत्वारि वाचः परिमितानि पदानि तानि विदुर्ब्राह्मणा ये मेधाविनो
गुहायां त्रीणि निहितानि नार्थं वेदयंते गुहा गूहतेस्तुरीयं त्वरतेः कतमानि तानि चत्वा
रि पदान्योंकारो महाव्याहृतयश्चेत्यार्षं नामाख्याते चोपसर्गनिपाताश्चेति वैयाक
रणा मंत्रः कल्पो ब्राह्मणं चतुर्थी व्यावहारिकीति याज्ञिका ऋचो यजूंषि सामानि
चतुर्थी व्यावहारिकीति नैरुक्ताः सर्पाणां वाग्वयसां क्षुद्रस्य सरीसृपस्य चतुर्थी
व्यावहारिकीत्येके पशुषु तूणवेषु मृगेषु आत्मनि चेत्यात्मप्रवादा अथापि ब्राह्मणं भ
वति सा वै वाक्सृष्टा चतुर्धा व्यभवदेष्वेव लोकेषु त्रीणि पशुषु तुरीयं या पृथिव्यां

उ०नि०

॥६५॥ साग्नौसास्यंतरिक्षेसावायौसावामदेव्येयादिक्षिसादित्येसाबृहस्पतिसास्तन
यित्नावथपरुस्तुतायावागादित्यरिंचततांब्राह्मणोपदधुस्तस्माद्ब्राह्मणाउभयीं
वाचंवदंतियाचदेवानांयाचमनुष्याणामित्यथैषाक्षरस्य॥१॥ऋचोअक्षरेपरमे
व्योमन्यस्मिंदेवाअधिविश्वेनिषेदुः।यस्तंनवेदकिमृचाकरिष्यतियइत्तद्विदुस्त
इमेसमासते॥ऋचोअक्षरेपरमेव्यवनेयस्मिंदेवाअधिनिषण्णाःसर्वेयस्तंनवे
दकिंसऋचाकरिष्यति।यइत्तद्विदुस्तइमेसमासतइतिविदुषउपदिशतिकतमत्तद
तदक्षरमोमित्येषावागितिशाकपूणिऋचश्चाह्यक्षरेपरमेव्यवनेधीयंतेनानादेव
तेषुचमंत्रेष्वेतद्धवाएतदक्षरंयत्सर्वांत्रयींविद्यांप्रतिप्रतीतिचब्राह्मणं॥१॥आदि ॥६५॥
त्यइतिपुत्रःशाकपूणेरेषर्ग्भवतियदेनमर्चंतिप्रत्यृचःसर्वाणिभूतानितस्ययद

नमसखामदन्नसखायेनःसखाय्यस्तैःसहेतिवा।सर्वस्माद्यइंद्रउत्तरस्तमेतद्ब्रमआ
दित्यमथैषाश्विनोः॥४॥सृण्येवज[illegible]र्भरीतुर्फरीतूनैतोशेवतुर्फरीपर्फरीका॥उद
न्यजेवजेमनामदेरूतामेजराय्वजरंमरायु॥सृण्येवेतिद्विविधासृणिर्भवतिभ
र्ताचहंताचतथाश्विनौचापिभर्तारौजर्भरीभर्तारावित्यर्थस्तुर्फरीतूहंतारौ।नैतोशेव
तुर्फरीपर्फरीका।नितोशस्यापत्यंनैतोशंनैतोशेवतुर्फरीक्षिप्रहंतारौ।उदन्यजेव
जेमनामदेरूउदन्यजेवेत्युदकजेइवरत्नेसामुद्रेचांद्रमसेवाजेमनेजयमानेजेम
नामदेरू।तामेजराय्वजरंमरायु।एतज्जराय्वजंशरीरंशरदमजीर्णमथैषासोम
स्य॥५॥तरत्समंदीधावतिधारासुतस्यांधसः॥तरत्समंदीधावति॥तरतिसप
पंसर्वंमंदीयस्तोतीतिधावतिगच्छत्यूर्ध्वांगतिं।धारासुतस्यांधसः॥धारयाभि

र्षेतद्भवति॥१२॥हृदातष्टेषुमनसोजवेषुयद्ब्राह्मणाःसंयजंतेसखायः॥अत्राहत्वंवि
॥६६॥ जहुर्वेद्याभिरोहब्रह्माणोविचरंत्युत्वे॥हृदातष्टेषुमनसोजवेषु॥यद्ब्राह्मणाःसंयजं प्र
ते।समानाख्यानाऋत्विजोऽत्राहत्वंविजहुर्वेद्याभिर्वेदितव्याभिःप्रवृत्तिभिरोहब्रा
ह्मणऊहब्राह्मणऊहएषांब्रह्मेतिवासेयंविद्याश्रुतिमतिबुद्धिस्तस्यास्तपसापा
रमीप्सितव्यंतदिदमायुमिच्छतानिर्वक्तव्यंतस्माच्छंदःसुशेषोपेक्षितव्याऽथ
गमायायांदेवतानिराहतस्यास्तस्यास्ताद्भाव्यमनुभवत्यनुभवति॥१३॥ ॥४॥
अयस्थूरवल्लं॥ ॥अथेमायद्यावोयदुर्दवोविहिंसातोऽस्त्राण्येवतरस्सक्ष्वतारिस्र्हेंगा
सुवर्येतम्भताक्षिवाग्टवोअक्षरआदित्यइत्यक्षरंनक्षरतिहृदातष्टेषुत्रयोदश॥ ॥ ॥६६॥
इतिनिरुक्तेत्रयोदशोऽध्यायः॥ ॥हरिःहिओम्॥व्याख्यातंदैवतंयज्ञांगंचाथातऊर्ध्व

नर्णगतिर्व्यारब्धास्याम: सूर्य आलोकमुदितस्य हि कर्म द्रष्टाऽथैतदनुप्रवदंत्यथैतं महांतमात्म
नमेषर्षाण: प्रवदं मीद्रं मित्रं वरुणमग्निमाहु रित्यथैष महानात्मा लोकजिज्ञासयात्मानं प्रो
वाचाग्निरस्मि जन्मना जातवेदा अहमस्मि प्रथमजा इत्येताभ्यां॥१॥अग्निरस्मि ज
न्मना जातवेदा घृतं मे चक्षुरमृतं म आसन्।अर्कस्त्रिधातू रजसो विमानोऽजस्रो
घर्मो हविरस्मि नाम।।अहमस्मि प्रथमजा ऋतस्य पूर्वं देवेभ्यो अमृतस्य नाभि:।
यो मा ददाति स इदेव मावा:।अहमन्नमन्नमदंतमद्मीति स हज्ञात्वा प्रादुर्बभूवै
वं तद्व्याजहारायं तमात्मानमभ्यात्मजमंतिकमन्यस्मा आचक्षीत।।२।।अपश्यं गो च
पामनिपद्यमानमा च परा च पथिभिश्चरंतं।।स सध्रीची: स विषूचीर्वसान आव
रीवर्ति भुवनेष्वंत:।आवरीवर्ति भुवनेष्वंतरित्यथैष महानात्मा सत्वलक्षणास्त

उ०नि०

सरं तद्ब्राह्मं तत्सत्यं तत्सलिले तदव्यक्तं तदस्पर्शं तदरूपं तदरसं तदगंधं तदमृतं
॥६७॥ तच्छुक्लं तल्लिंगोऽप्यृतात्मा सैषाम्नातप्रकृतिरित्येके तत्क्षेत्रं तदज्ञानात्क्षेत्रज्ञमनुप्र
प्यनिरात्मजमथैष महानात्मा त्रिविधो भवति सत्त्वं रजस्तम इति सत्त्वं तु मध्ये वि
शुद्धं तिष्ठत्यभितो रजस्तमसी रज इति कामद्वेषस्तम इत्यविज्ञातस्य विशुद्धं त
प्रकृतिं कुर्वतः क्षेत्रज्ञपृथक्त्वाय कल्पते प्रतिभातिलिंगो महानात्मा तमोलिंगोऽवि
द्याप्रकाशलिंगस्तमोऽपि नित्यया लिंगभाकाशः ॥३॥ आकाशस्तु गुणः शब्द आका
शाद्वायुर्द्विगुणः स्पर्शेन वायोर्ज्योतिस्त्रिगुणं रूपेण ज्योतिष आपश्चतुर्गुणा रसे
नाद्भ्यः पृथिवी पंचगुणा गंधेन पृथिव्या भूतग्रामस्थावरजंगमास्तदेतदहर्युग ॥६७॥
सहस्रं जागर्ति तस्यां ते सुषुप्स्यन्नंगानि प्रत्याहरति भूतग्रामाः पृथिवीमपियंति

पृथिव्यप्स्वापो ज्योतिषं ज्योतिर्वायुं वायुराकाशमाकाशो मनो मनो विद्यां विद्या महां
तमात्मानं महानात्मा प्रतिभां प्रतिभा प्रकृतिं सा स्वपिति युगसहस्रं रात्रिस्तावे ताव
द्धोरात्राव जस्रं परिवर्त्तेते स कालस्तदेतदहर्भवति युगसहस्रपर्यंतमहर्यद्ब्रह्म
णो विदू रात्रिं युगसहस्रांतां तेऽहोरात्रविदो जना इति ॥४॥ तं परिवर्त्तमानमन्योऽ
नुप्रवर्त्तते स्रष्टा द्रष्टा विभक्तातिमात्रोऽहमिति गम्यते स मिथ्यादर्शनेदं पावकं म
हाभूते सुप्तिरोत्वाकाशाद्वायोः प्राणश्चक्षुश्च वक्तारं च तेजसोऽद्भ्यः स्नेह पृथिव्या
मूर्त्तिः पार्थिवांस्त्रष्टौ गुणान्विद्यान्मातृतस्त्रीन्पितृतोऽस्थिस्नायुमज्जानः पितृ
तस्त्वङ्मांसशोणितानि मातृतोऽन्नपानमित्यष्टौ सोऽयं पुरुषः सर्वमयः सर्वज्ञानोपि
कृप्तः ॥५॥ स यद्यनुरुध्यते तद्भवति यदि धर्मोऽनुरुध्यते तद्देवो भवति यदि ज्ञानम

योहृत्पूर्णोतिथोपस्थरुदपास्येतन्मूत्रपुरीषं कस्मादाहारपानसिक्तत्वादनुपचि
तकर्मणावन्योन्यंजायेते इति तं विद्याकर्मणीसमन्वारभेते पूर्वप्रज्ञा च महत्यज्ञा
नतमसि मग्नोजरामर्येरक्षुत्पिपासाशोकक्रोधद्रोहलोभमोहमदभयमत्सर
हर्षविषादेर्ष्यासूयात्मकैर्द्वंद्वैरभिभूयमानः सोऽस्मादार्जवंजवीभावनांतेनि
र्मुच्यते सोऽस्मापन्नं महाभूमिकावच्छरीरान्निमेषमात्रैः प्रक्रम्य प्रकृतिरधिप
रोऽस्य तेजसंशरीरंकृत्वा कर्मणोऽनुरूपं फलमनुभूय तस्य संक्षये पुनरिमंलोकं
प्रतिपद्यते ॥७॥ अथ ये हि सामाश्रित्य विद्यामुत्सृज्य महत्तपस्तोपिरचिरेण वेदो
क्तानिवाकर्माणिकुर्वंति ते धूममभिसंभवंति धूमाद्रात्रिं रात्रेरपक्षीयमाणपक्ष ॥६९॥
मपक्षीयमाणपक्षाद्दक्षिणायनं दक्षिणायनात्पितृलोकं पितृलोकाच्चंद्रमसं

उ॰नि॰

सःप्राणंस्सूर्यंयस्तस्थगामिनश्वरस्याविद्वांसःक्षेत्रज्ञमनुप्रवेत्यथाहोविद्वांसःक्षेत्रज्ञे
॥८०॥ नुकल्पतेतस्यतपसासहाप्रमादमेत्यथाप्तव्योभवतितेनासंततमिच्छेत्तेनस
ख्यमिच्छेदेषहिसखाश्रेष्ठःसंज्ञानातिभूतंभवद्भविष्यदितिज्ञाताकस्माज्जायते:
सखाकस्मात्सख्यतेःसहभूतेंद्रियैःशेरतेमहाभूतानिसेंद्रियाणिप्रज्ञयाकर्म शिष्य
कारयतीतिवातस्यतपःप्रतिष्ठाशीलमुपशममात्माब्रह्मेतिसब्रह्मभूतोभवति
साक्षिमात्रोव्यवतिष्ठतेबंधोऽज्ञानकृतोऽथात्मनोमहतःप्रथमंभूतनामधेया
न्यनुक्रमिष्यामः॥१०॥हंसः।घर्मः।यज्ञः।वेनः।मेधः।कृमिः।भूमिः।विभुः।प्रभुः।
शंभुः।राष्टुः।वधकर्मा।सोमः।भूतं।भुवनं।भविष्यत्।आपः।महत्।व्योम।यशः। ॥८०॥
महः।स्वर्णीकं।स्मृतीकं।स्वृतीकं।स्तीकं।सतीकं।सतीनं।गहनं।गभीरं।गह्वरं।कं।

अन्नं।हविः।सद्म।सदनं।ऋतं।योनिः।ऋतस्ययोनिः।सत्यं।नीरं।हविः।रयिः।सत्।
पूर्णं।सर्वं।अक्षितं।बर्हिः।नाम।सर्पिः।आपः।पवित्रं।अमृतं।इंदुः।हेमः।स्वः।स्व
र्गः।शंबरं।अंबरं।वियत्।व्योम।बर्हिः।धन्व।अंतरिक्षं।आकाशं।आपः।पृथिवी।भूः।
स्वयंभूः।अध्वा।पुष्करं।सगरः।समुद्रः।तपः।तेजः।सिंधुः।अर्णवः।नाभिः।वृक्षः।
ऊधः।तत्।यत्।किं।ब्रह्म।वरेण्यं।हंसः।आत्मा।भवति।वधंत्यद्वान।यद्वाहिष्ठा।श श्री
रीराणि।अव्ययंचसंस्कुरुते।यज्ञः।आत्मा।भवति।यदेनमन्यतेऽथैतंमहांतमात्मा
नमेतानिसूक्तान्येतान्यृचोऽनुप्रवदंति॥११॥सोमःपवतेजनितामतीनांजनितादि
वोजनितापृथिव्याः।जनिताग्नेर्जनितासूर्यस्यजनितेंद्रस्यजनितोतविष्णोः।सो
मःपवतेसोमःसूर्यःप्रसवनाज्जनितामितीनांप्रकाशकर्मणामादित्यरश्मीनांदिवो

तनकर्मणामादित्यरश्मीनां पृथिव्याः प्रथनकर्मणामादित्यरश्मीनामग्नेर्गतिकर्मणा
मादित्यरश्मीनां सूर्यस्य स्वीकरणकर्मणामादित्यरश्मीनामिंद्रस्यैश्वर्यकर्मणामा
दित्यरश्मीनां विष्णोर्व्याप्तिकर्मणामादित्यरश्मीनामधिदैवतमथाध्यात्मं सोम
आत्माप्येतस्मादेवेंद्रियाणां जनितेत्यर्थः। अपि वा सर्वाभिर्विभूतिभिर्विभूततम
आत्मेत्यात्मगतिमाचष्टे॥१२॥ ब्रह्मा देवानां पदवीः कविनामृषिर्विप्राणां महिषो
मृगाणां॥ श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन्॥ ब्रह्मा देवा
नामित्येष हि ब्रह्मा भवति देवानां देवनकर्मणामादित्यरश्मीनां पदवीः कवीनामित्ये
ष हि पदं वेत्ति कवीनां कवीयमानानामादित्यरश्मीनामृषिर्विप्राणामित्येष ह्यृषणो
भवति विप्राणां व्यापनकर्मणामादित्यरश्मीनां महिषो मृगाणामित्येष हि महान्भवति

द्रमसो वायुं वायोर्वृष्टिं वृष्टेरोषधयश्चैतद्भूत्वा तस्य संक्षये पुनरेवेमं लोकं प्रतिपद्यते॥
॥८॥ अथ ये हिंसामुत्सृज्य विद्यामाश्रित्य महत्तपस्तेपिरे ज्ञानोक्तानि वा कर्माणि कु
र्वंति तेऽर्चिरभिसंभवंत्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षादुद
गयनमुदगयनाद्देवलोकं देवलोकादादित्यं लोकमादित्याद्वैद्युतं वैद्युतान्मान
सं मानसः पुरुषो भूत्वा ब्रह्मलोकमभिसंभवंति ते न पुनरावर्तंते शिष्टादंदशू
कायत इदं न जानंति तस्मादिदं वेदितव्यमथाप्याह॥१॥ न तं विदाथ य इमा ज
जानान्यद्युष्माकमंतरं बभूव॥ नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्च
रंति॥ न तं विदथ ये विद्वांसो वदंत्यक्षरं ब्रह्मणस्पतिमन्यद्युष्माकमं
तरमन्यदेषामंतरं बभूवेति नीहारेण प्रावृतास्तमसा जल्प्या चासुतृप उक्थशा

॥७२॥ तानींद्रियाण्यपि गृध्यंते ज्ञानकर्माणि य तएतस्मिंल्लिष्ठति स्वाधितिर्वनानामित्ययमपि स्वयं
कर्माण्यात्मनि धत्ते वनानो वनकर्मणामिंद्रियाणां सोमः पवित्रमत्येति रेभन्नित्यय
मपि पवित्रमिंद्रियाण्यसेति स्तूयमानोऽयमेवैतत्सर्वमनुभवत्यात्मगतिमाचष्टे।
।१३। तिस्रो वाच ईरयति प्रवह्निर्ऋतस्य धीतिं ब्रह्मणो मनीषां॥ गावो यंति गोपतिं पृ
छमानाः सोमं यंति मतयो वावशानाः॥ वह्निरादित्यो भवति स तिस्रो वाचः प्रेरयत्यृ
चो यजूंषि सामान्यृतस्यादित्यस्य कर्माणि ब्रह्मणो मतान्येष एवैतत्सर्वमक्षरमि
त्यधिदैवतमथाध्यात्मं वह्निरात्मा भवति स तिस्रो वाच ईरयति प्रेरयति विद्यामति
बुद्धमतामृतस्यात्मनः कर्माणि ब्रह्मणो मतान्ययमेवैतत्सर्वमनुभवत्यात्मगतिमा ॥७२॥
चष्टे।१४।सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः पृच्छमानाः॥ सोमः सुतः

उ०नि०

॥७३॥

नेवर्षकर्मणाजनयन्नजाभुवनस्यराजा सर्वस्यराजा॥ वृषापवित्रेअधि सानोअव्येबृ
हत्सोमोवावृधेसुवानइंदुरित्यधिदैवतमथाध्यात्ममत्यकर्मी समुद्रआत्मापरमेव
वनेज्ञानकर्मणा जनयन्नजाभुवनस्यराजासर्वस्यराजा वृषापवित्रेअधिसानो
अव्येबृहत्सोमोवावृधेसुवानइंदुरित्यात्मगतिमाचष्टे॥१६॥ महत्तत्सोमोमहि
षश्चकारापांयद्गर्भोवृणीत देवान्। अदधादिंद्रेपवमानओजोजनयत्सूर्येज्योति
रिंदुः॥ महत्तत्सोमोमहिषश्चकारापांयद्गर्भोवृणीत देवानाधिपत्यमदधादिंद्रेप
वमानओजोजनयत्सूर्येज्योतिरिंदुरादित्यइंदुरात्मा॥१७॥ विधुंदद्राणंसमनेबहू
नांयुवानंसंतंपलितोजगार॥ देवस्यपश्यकाव्यंमहित्वाद्यामममारसह्यः समान ॥७२॥
॥विधुंविधमनशीलंदद्राणंदमनशीलंयुवानंचंद्रमसंपलितआदित्योगिरति

सह्यःम्रियतेसद्दिवासमुदितेत्यधिदैवतमथाध्यात्मंविधुंविधमनशीलंदद्राणंदमनशी
लंयुवानंमहांतंपलितआत्मागिरतिरात्रौम्रियतेरात्रिःसमुदितेत्यात्मगतिमाचष्टे॥
१८॥ साकंजानांसप्तथमाहुरेकजंषळिद्यमाऋषयोदेवजाइति। तेषामिष्टानि विहि
तानिधामशःस्थात्रेरेजंतेविकृतानिरूपशः॥ सहजातानामृषीणामृषीणामादि
त्यः सप्तमस्तेषामिष्टानि कांतानिवाक्रांतानिवागतानिवामतानिनतानिवाद्भिः
सहसंमोदंतेयत्रैतानिसप्तऋषीणानिज्योतींषितेभ्यःपरआदित्यस्तान्येतस्मिन्ले
कंभवंतीत्यधिदैवतमथाध्यात्मंसहजातानांषण्णामिंद्रियाणामात्मासप्तमस्तेषा
मिष्टानिवाकांतानिवाक्रांतानिवागतानिवामतानिवानतानिवाऽन्नेनसहसंमोदंतेय
त्रेमानिसप्तऋषीणानींद्रियाण्येभ्यःपरआत्मातान्यस्मिन्लेकंभवंतीत्यात्मगतिमाचष्टे॥१९॥

स्त्रियः सतीस्ताउमेपुंसआहुःपश्यदक्षण्वान्नविचेतदंधः॥कविर्यःपुत्रः सईमाचि
॥७४॥ केतयस्ताविजानात्सपितुष्पितासत्॥स्त्रिय एवैताःशब्दस्पर्शरूपरसगंधहारिण्य
स्ताअमुंपुंत्वेशब्देननिराहारःप्राणइतिपश्यन्चक्षुष्मान्नविजानात्यंधःकविर्यःपुत्रः
सइमाजानातियःसाइमाजानातिसपितुष्पितासदित्यात्मगतिमाचष्टे॥२०॥सप्ता
स्य र्धगर्भाभुवनस्यरेतोविष्णोस्तिष्ठंतिप्रदिशाविधर्मणि॥तेधीतिभिर्मनसातेविप
श्चितःपरिभुवःपरिभवंतिविश्वतः॥सप्तैतानादित्यरश्मीनाममादित्योगिरतिमध्य
स्थानोर्ध्वमाद्यायान्येतस्मिंस्तिष्ठंतितानिधीतिभिश्चमनसाचविपर्ययंतिपरिभु
वःपरिभवंतिसर्वाणिकर्माणिवर्षकर्मणेत्यधिदैवतमथाध्यात्मंसप्तेमानींद्रियाण्य ॥७४॥
यमात्मागिरतिमध्यस्थानोर्ध्वमाद्यायान्यस्मिंस्तिष्ठंतितानिधीतिभिश्चमनसाचवि

प्रपृथेअज्यमानःसोमेअर्काःत्रिष्टुभःसंनवंते॥एतएवसोमंगावोधेनवोरश्मयोवावश्य
मानाःकामयमानाआदित्यंयंत्येवमेवसोमंविप्रारश्मयोमतिभिःपृच्छमानाःकामयमा
नाआदित्यंयंत्येवमेवसोमःसुतःपूयतेअज्यमानएतमेवार्काश्चत्रिष्टुभश्चसंनु
वंतेततएतस्मिन्नादित्यएकंभवंतीत्यधिदैवतमथाध्यात्ममेतएवसोमंगावोधे
नवइंद्रियाणिवावश्यमानानिकामयमानान्यात्मानंयंत्येवमेवसोमंविप्राइंद्रि
याणिमतिभिःपृच्छमानानिकामयमानान्यात्मानंयंत्येवसोमःसुतःपूयतेअज्यमा
नइममेवात्मानंसप्तऋषयश्चसंनवंतेतान्येतस्मिन्नात्मन्येकंभवंतीत्यात्मगतिमा
चष्टे॥१५॥अक्रान्त्समुद्रःप्रथमेविधर्मञ्जनयन्प्रजाभुवनस्यराजा॥वृषापवित्रेअधि
धिसानोअव्येबृहत्सोमोवावृधेसुवानइंदुः॥अत्यक्रमीत्समुद्रआदित्यःपरमेव्यव

ज्ञानो निरिणाति शत्रून्ननु यं विश्वे मदंत्यूमाः ॥ तद्भवति भूतेषु भुवनेषु ज्येष्ठमादित्यं
यतो जज्ञ उग्रस्त्वेषनृम्णो दीप्तिनृम्णः सद्यो जज्ञानो निरिणाति शत्रून्नितिरिणातिः प्री
तिकर्मा दीप्तिकर्मा वाऽनुमदंति यं विश्व ऊमा इत्यधिदैवतमथाध्यात्मं तद्भवति भूतेषु
भुवनेषु ज्येष्ठमव्यक्तं तपोजा यत उग्रस्त्वेषनृम्णो ज्ञाननृम्णः सद्यो जज्ञानो निरिणाति
शत्रून्नितिरिणातिः प्रीतिकर्मा दीप्तिकर्मा वाऽनुमदंति यं सर्व ऊमा इत्यात्मगतिमाचष्टे
॥२४॥ को अद्य युंक्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् ॥ आसन्निषून्हृत्स्व
सो मयोभून्य एषां भृत्यामृणधत्स जीवात् ॥ क आदित्यो धुरि गा युंक्ते रश्मीन्कर्मवतो
भानुमतो दुराधर्षानसत्त्यसुनवंतोषून्निषुणवंति मयोभून्निसुखभूनि य एषां संपृ
तं वेद कथं स जीवतीत्यधिदैवतमथाध्यात्मं क आत्मा धुरि गा युंक्ते इंद्रियाणि कर्मव

तोभसुमतेदुराधर्षानस्त्र्यस्तुनवंती प्रानिषुणवंतिमयोफ्लानिसुखफ्लानि यद्दमंसोष्ट
तंवेदंचिरंजीवतीत्यास्मगातिमाचक्षे ॥२५॥ कईषते लुज्यते को बिभायको मंसते सं
तभिंद्रं कोऔंति ॥ कस्तोकायकद्दमायुतरायोधिश्रवृत्तन्चेरकोजनाय ॥ कूएव
गछाति को ददाति को बिभेति । कोमंसते संतभिंद्रं । कस्तोकाया पत्याय महते च
नोरयायरमणीयायदर्शनीयाय ॥२६॥ कोअग्निमीट्टे हविषाघृतेन स्रुचाय
जातान्ऋतुभिर्ध्रुवेभिः । कस्मैदेवाआवहानाषुहोमकोमंसतेवीतिहोत्रःसुदेवः ॥
कआदित्यंभरयातिहविषाघृतेनच । स्रुचायजातान्ऋतुभिर्ध्रुवेभिरिति । कस्मै
देवाआवहानाशुहोमार्थायान् । कोमंसतेवीतिहोत्रः सुदेवः । कल्याणदेवइत्यधि
देवतमथाध्यात्मंकआत्मानंभरयातिहविषाघृतेनच । स्रुचायजातान्ऋतुभि

ॐ वेभिरिति। कस्मै देवा आवहानाशुहोमार्थान्। कोमंसतेवीतिहोत्रेस्रुवेवज्रः क
ल्याणप्रज्ञइत्यात्मगतिमावष्टे॥२७॥ त्वमंगप्रशंसिषोदेव शविष्ठमर्त्यं॥ नत्वदन्यो
मघवन्नस्तिमर्डितेंद्रब्रवीमितेवचः॥ त्वमंगप्रशंसीर्देवः शविष्ठमर्त्यंनत्वदन्यो सि
मघवन्याताववापालयिताबाजेतावाखुखयितावेंद्र ब्रवीमितेवचः स्कोति संप्रयुक्तं
॥२८॥ हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्॥ नृषद्वर
सदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतं॥ हंसइतिहंसाः सूर्यरश्म
यः परमात्मा परंज्योतिः पृथिवीव्याप्तेतिव्याप्तंसर्वव्याप्तंवननकर्मणानभ्यासेना
दित्यमंडलेनेत्ययतीतिलोकोऽत्ययतीतिहंसयंत्ययतीतिहंसाः परमहंसाः पर
मात्मा सूर्यरश्मिभिः अक्षतगभीरवसतीतिरश्मिभिर्वसतीतिवारश्मिभिर्वसतीति

॥७८॥

भिरसमाननाभिर्याःकाश्चसिंधुंपातिंकृत्वानद्योवहतिसर्पोजीर्णामिवसर्पस्त्वचंस
जतिपापंत्यजंत्याप्नोतिस्तासामेषाभवति ॥३४॥ त्र्यंबकंयजामहेसुगंधिंपु
ष्टिवर्धनं ॥ उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् ॥ त्र्यंबकोरुद्रः त्र्यंबकं स्तं
यजामहेसुगंधिंसगंधिंपुष्टिगंधिंपुष्टिवर्धनंपुष्टिकारकमिवोर्वारुकमिवफ
लंबंधनादारोधनान्मृत्योःसकाशान्मुंचस्वमांकस्मादित्येषामितरेषापराभव
ति ॥३५॥ शतंजीवशरदोवर्धमानःशतंहेमंतांछतमुवसंतान् ॥ शतमिंद्राग्नी
सविताबृहस्पतिःशतायुषाहविषेमंपुनर्दुः ॥ शतंजीवशरदोवर्धमानइत्यपिनि
गमोभवतिशतमितिशतंदीर्घमायुर्मरुतएनावर्धयंतिशतमेनमेवशतात्मानं ॥७८॥
भवतिशतमनंतंभवतिशतमैश्वर्यंभवतिशतमितिशतंदीर्घमायुः ॥३६॥ ॥

वावह्निर्वसतीतिवासुवर्णरेताःपूषागर्भास्तिभेतिरश्मिंतावनकुटिलान्तिकुटंतारि
भंतान्नीरिक्षावसिद्दितिद्विविभुविगमनेवासुभानुःखुप्रभृतोहोताह्वित्यस्यगताभ
वंत्यतिथिर्दुरोणसत्सर्वेदुरोणसद्वसेसर्वेरसाविकर्षयतिरश्मिभिर्विकर्षयतिवा
विकर्षयतिवननंभवत्यब्जागोजाअद्रिजागोजाधरित्रीगोजाःसर्वेगोजाऋतजा
बृहच्छ्रुत्भवतिनिगमोनिगमव्याख्याभवत्यृषेनिर्वचनाय ॥१९॥ द्वासुपर्णास
युजासखायासमानंवृक्षंपरिषस्वजाते ॥ तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्न
न्योअभिचाकशीति ॥ द्वौद्वौप्रतिष्ठितौसुकृतौधर्मकर्तारौदुष्कृतंपापंपरिसारक
मित्याचक्षते ॥ सुपर्णासयुजासखायेत्यात्मानंदुरात्मानंप्रत्युतिष्ठतिशरीरएव
तज्जायतेवृक्षंरक्षशरीरंवृक्षंपक्षौप्रतिष्ठापयतितयोरन्यद्भुक्तान्नमनश्नन्

धना

मातेराधांसिमातदुतयेवसोऽस्मान्कदाचनादभन्॥ विश्वाचनउपमिमीहिमानुषवसूनिचर्ष
णिभ्यआ॥ माचतेधामानिमाचतेकदाचनःरिरिषुःसर्वाणिप्रज्ञानान्युपमानायमनुष्य
हितायुमादित्योऽयमात्माऽथैतदनुप्रवदंत्यथैतंमहांतमात्मानमेषगणःप्रवदतीवै
श्वकर्मणो॥ देवानांनुवयंजानासदासीत्तदानीमितिचसैषात्मजिज्ञासासैषासर्व
भूतजिज्ञासाब्रह्मणःसारिष्टिंसन्तपतांसलोकतांगमयतियएवंवेदनमोब्रह्मणे
नमोमहतेभूतायनमःपारस्करायब्रह्मशुक्रमसीयब्रह्मशुक्रमसीय॥ ३७॥ ॥
अथश्रेयले॥ ॥ व्याख्यातंदैवतमग्निरस्मिजन्मनाऽपश्यंगोपामाकाशगुणस्तं
परिवर्तमानेसघनुरुध्यतेऽंतोतरमथयोहिंसामाश्रित्याथहिंसामुत्सृज्यनतंहसो
घर्मःसोमःपवतेब्रह्मादेवानांतिस्रोवाचईरयतिसोमंगावोआकोमहत्तत्सोमाविधं
दद्राणंसमकंजानाःस्त्रियःसतीःसप्तार्धगर्भानबिजानाम्यपाङ्प्राङेतितद्विदासकौ
अधमुङ्तेकईषतेकाअग्निमीडेतमंगेहंसःशुचिषद्द्वासुपर्णाऽयाहीन्द्रविप्रंविप्रासोजातवेद
सइदंतेन्याभिस्त्र्यंबकंशतंजीवमातेराधांसिसप्तत्रिंशत्॥ इतिनैरुक्तेउत्तरषट्केऽध्यायः॥
चतुर्दशो